<u>मुख्यवार्ताः</u>

- बिहारविधानसभानिर्वाचनाय प्रचाराभियानम् समेधतेतराम् । प्रधानमन्त्रिणा जनसभात्रयम् सम्बोधितम् । प्रोक्तं च यत् बिहारविकासाय नीतीशकुमार-नेतृत्वयुतं राष्ट्रिय-जनतान्त्रिक-संयुति-प्रशासनम् अतीव आवश्यकम् ।
- कांग्रेसनेता राहुलो गांधी राजद नेत्रा तेजस्वी यादवेन साकंबिहारे संयुक्त जनसभाम् समबोधयत् ।
- कोविड नाइन्टीन् इति वैश्विक-सङ्क्रमण-प्रकरणे प्रगतिपथे वर्तते भारतम् । स्वास्थ्यलाभे प्रतिशतं पञ्च त्रीणि दशमलवोत्तर नवाशीतिमितः वर्तते ।
- अशेषे हि देशे हर्षोल्लासेन सश्रद्धं च समायोज्यते दुर्गादेव्याः महासप्तती पर्व समायोज्यते ।
- इण्डियन् प्रीमियर लीग इति स्पर्धामालायाम् अद्य शाहजहां क्रीडाङ्गणे चेन्नई सुपरकिंग्स दलं मुम्बई इण्डियंस इत्येतत् दलं च अन्तरा द्वन्द्वः ।

1. भारतीय जनता पार्टीति दलस्य वरिष्ठो नेता प्रधानमन्त्री च नरेन्द्रमोदी अद्य बिहार-विधानसभा-निर्वाचनान्यालक्ष्य जनसभात्रयं समबोधयत् । तेन सासाराम-गया-भागलपुरेषु जनसभाः सम्बोधिताः । प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् बिहारस्य जनसामान्यम् अस्ति सङ्कल्पबद्धम् यत् ते पुनः शासनाधिरूढाः नैव भवेयुः ये बिहारराज्यं विकासपथात् अपसारितवन्तः । बिहारविधानसभायै सासारामे स्वीयां प्रथमां जनसभां सम्बोधयन् श्रीमोदी अब्रवीत् यत् बिहारे पूर्वं शासनाधिरूढाः जनाः अधुना बिहारस्य विकासशीलशासनम् प्रलोभनदृष्ट्या पश्यन्तः सन्ति । मोदिना प्रोक्तं यत् न खलु एवं विस्मारणीयाः ये बिहारराज्यं पश्चिवर्तिराज्येषु समावेशयन् यदा राज्ये विधिव्यवस्था अस्तव्यव्यस्तायिता आसीत्, भ्रष्टाचारः चरमस्थितिं समेधितो अवर्तत इति । प्रधानमन्त्रिणोक्तं यत् बिहारस्य विकासाय नीतीशकुमारस्य नेतृत्वे राष्ट्रिय-जनतान्त्रिक-संयुति प्रशासनं वर्तते अत्यावश्यकम् । श्रीमोदी प्रत्यपादयत् यत् राष्ट्रियजनान्त्रिक-संयुति-प्रशासनेन सप्तति-त्युत्तर-त्रिशतम् अनुच्छेदः अपाकृतः चेत् एत् तत्प्रवर्तनाय वाञ्चन्ति, अभिनव-कृषिकृषकनीतिम् च आलक्ष्य भ्रमः प्रसार्यते एतैः । यतोहि एते न्यूनतम-समर्थन-मूल्यनाम्ना तान् मध्यस्थान् विमोचयितुम् इच्छन्ति इति ।प्रधानमन्त्रिणा साकं नैर्वाचनिक-मञ्चे जनता दल युनाइटेड् इत्येतत् दलस्य अध्यक्षः बिहारराज्यस्य मुख्यमन्त्री नीतीशकुमारश्च प्रावोचत् यत् प्रधानमन्त्रिणो मोदिनो नेतृत्वे बिहारराज्यस्य विकासाय तेन महत्कार्याणि साधितानि, पुनः प्रशासनं विरचिते सति असौ सुनिश्चितीकरिष्यति यत् प्रत्येको ग्रामः सिञ्चनसौविध्येन आधुनिक प्रौद्यौगिक्या च संवलितो भवेदिति । भागलपुरे एकाम् अन्यां नैर्वाचनिकीं जनसभां सम्बोधयता प्रधानमन्त्री नक्सलवादिनां समर्थनाय महासंयुतिम् आलक्ष्य टीकास्त्रं प्रक्षेपितम् । तेन प्रोक्तं यत् नक्सलिनो अपाकृताः सन्ति केषुचित् क्षेत्रेषु ये

अवशिष्टास्तेऽपाकरणीयाः सन्ति इति । प्रधानमन्त्रिणा स्पष्टीकृतं यत् राष्ट्रिय-जनतान्त्रिक-संयुति-प्रशासनं बिहारस्य विकासाय प्रतिबद्धम् अस्ति ।

2. कांग्रेस दलस्य वरिष्ठो नेता राहुलगांधी राष्ट्रियजनतान्त्रिकसंयुति-प्रशासनं समाक्षिपत् । तेन प्रोक्तं अनेन हि द्विकोटियुवकेभ्यो वृत्त्यवसरप्रदानपरं स्वीयं वचनं नैव निभालितम् । बिहारस्य नवादा जनपदे स्वीयं नैर्वाचनिकप्रचारकार्यक्रमं सम्बोधयता तेन प्रोक्तं यत् राष्ट्रियजनतान्त्रिकसंयुति-प्रशासनं कृषकैस्साकं छलयत् अस्ति अपि च अभिनवकृषिसम्बद्धविधिना कृषकाणाम् अधिकारान् पूंजीपतिभ्यो प्रददाति इति । तेन प्रोक्तं कांग्रेस प्रशासनं कृषकाणां हिताय वर्तते कार्यरतम् एतत्क्रमे तैः सप्ततिसहस्रकोटितोप्यधिकमितं कृषकऋणं विमोचितम् इति । श्रीगांधी अवोचत् यत् राष्ट्रियजनतान्त्रिकसंयुति-प्रशासनस्य विमुद्रीकरणनिर्णय सामान्यजनानां लघुव्यापारिणां जनजीवनम् अस्तव्यस्तायितम् इति । अपरतः बहुजनसमाजपार्टीति दलाध्यक्षा मायावती कैमूरे जनसभां समबोधयत्

3. देशेन कोरोनाप्रतिसंघर्षे नूतनः इतिहासो विरचित:। मास-द्वया-नन्तरं पुनरेकदा राष्ट्रे संक्रमण-ग्रस्तानां सक्रिया संख्या सप्त-लक्षतो न्यूना संजातास्ति।देशेइदानींमहामारि-पीडितानांसक्रियासंख्याप्राय: पंच-शताधिक-पंच-नवति-सहस्रोत्तर-षट्लक्ष-परिमिताविधीयते।संख्येयं कुलप्रकरणानां नव-प्रतिशत-मिततोपि न्यूना वर्तते।स्वस्थताम् अवाप्तवतां संख्यापि अनुदिनं विवर्धते।अद्यावधि सप्त-लक्ष-प्राया: प्रकोप-प्रपीडिता: चिकित्सावकाशं प्राप्ता:।सक्रिय-प्रकरणानां स्वस्थीभूतानां च मध्ये अन्तरालोपि अनुक्रमं संवर्धते।सक्रिय-प्रकरणानामपेक्षया स्वस्थतां गतानां प्रकरणानि प्रायेण संवृत्तानि दश-गुणितानि।विगतेचतुर्विंशति होरात्मके कालेचतु:सप्तति-सहस्रतोपिअधिका: संक्रमिता: स्वस्था: अभूवन्।तत्रैवचतु:पंचाशत्नूतनानिप्रकरणानिपुष्टिंगतानि।रोगाद्विमुक्तानांप्रतिशतताभूयोपिनवाशीति-परिमितास्तिसमेधिता।स्वास्थ्य-मंत्रालयेन विज्ञापितं यत् सर्वेषां समन्वित-प्रयासेन मृत्युमिति: अपि अनुदिनं अपचीयते। इदानीं विषाणुग्रस्तानां कालकवलितानां मिति: प्राय: सार्धैकपरिमिता एवावशिष्टा।विगतो अहोरात्रे नवत्यधिक-षट्शत-संख्याकानां विषाणु-पीडितानां मृत्यु: संसूच्यते।देशेनदश-कोटि-परीक्षणानांलक्ष्यमपिअवाप्तम्।विगतेचतुर्विंशति होरात्मके कालेदेशेद्वि-चत्वारिंशत-सहस्रोत्तर-चतुर्दश-लक्ष-परीक्षणानिविहितानिसन्ति इति ।

4. अभिभारतं महासप्तमी धार्मिकरीत्या पूर्णश्रद्धया उल्लासेन चामान्यते।त्रिपुरायां दुर्गापूजोत्सव: धार्मिक-पद्धत्या हर्षोल्लासेन आमान्यते।कोरोना-महामारीं अवलम्ब्य उत्सवावधौ स्वास्थ्य-सम्बद्धानां दिङ्-निर्देशानां अनुपालनं कठोरतया विधीयमानमस्ति।अद्य प्रात: शंख-नाद-घण्टादीनां ध्वनि-पुरस्सरं मंदिरेषु,आश्रमेषु,सामुदायिक-मण्डपेषु चापि अर्चना समारब्धा।यद्यपि अगरतलाया: मंदिरमण्डपेषु श्रद्धालूनां समागम: न तथा दरीदृष्ट:।वार्ताहरानुसारिप्रात:कालादेवकिंचित्किंचित्वृष्टिपातोजाजायते।पुनरपिमण्डपेषुपुष्पांजलि-सहिता: श्रद्धालव: सन्तिएकत्रीभूता:। अवधेयास्पदं वर्तते यत् अत्रांतरेपूर्णतोदृशादरीदृष्टंकोरोना-सम्बद्धंदिङ्-निर्देशानुपालनम् इति ।

5. आईपीएल क्रिकेट् स्पर्धामालिका सम्बद्धा सूचना इदानीम्। शारजाहे अनुवर्तमानायां अस्यां प्रतिस्पर्धायां अद्य चेन्नई सुपर किंग्सवृन्दं, मुंबई इंडियन्सदलं सम्मुखीकरिष्यति।अपरत: सनराइजर्स हैदराबाददलेन राजस्थान रॉयल्सदलं अष्ट-क्रीडकानां हानिपुरस्सरं प्ले-ऑफ क्रीडायां निजप्रवेशस्य भावोस्ति सुरक्षित:।गतरात्रौशारजाहस्थलेसमनुष्ठितायांस्पर्धायांराजस्थानरॉयल्सवृन्देनप्रथमंक्रीडताविंशति:-क्षेपचक्रेषुषट्क्रीडक-हानि-पुरस्सरंचतु:पंचाशदुत्तर-शतंधावनांका: अर्जिता: आसन्।प्रत्युत्तरेसनराईजर्स-हैदराबाद-दलेन अपेक्षया अधिकान् अंकान् समर्ज्य विजयलक्ष्यं अवाप्तम्।विजयमानेन अनेन सनराइजर्सहैदराबाद-दलेनअंकतालिकायांपंचमंस्थानंसम्प्राप्तम्।तत्रैवसप्तम-स्थान-भाक्अस्तिराजस्थान-रॉयल्स-दलम् इति ।

6. कर्नाटकस्य उपमुख्यमंत्री, उच्चशिक्षामंत्री च डॉक्टर अश्वत-नारायण: समुदघोषयत् यत् राज्ये महाविद्यालया: नवम्बर-मासस्य सप्तदश-दिनांकत: उद्घाटयिष्यन्ते।अस्मदीयवार्ताहर: समसूचयत् यत् , एतेषु महाविद्यालयेषु विश्वविद्यालय-अनुदान-आयोगेन प्रख्यापित-दि-निर्देशानुरूपमेव कक्षा: समारप्स्यन्ते इति ।

7. नौसेन्यप्रमुख: एडमिरल् करमबीरसिंह: भारतीयनौसैन्यान्तर्गतानां प्रमुखयुद्धपोतानां संचालनंयुद्धक-सज्जताश्च समैक्षत।असौ कारवाड-स्थितंनौ-सेन्य-केन्द्रंसम्प्राप्यनौसैनिकै: समंसम्भाषणंसमाचरत्।अत्रांतरेतेनयुद्धपोतानांक्षमतांतत्सुदृढी-करणोपायान्समेत्यअन्येचापिमहत्वपूर्णा: विषया: परिचर्चिता:।नौसेन्य-प्रमुखेनआतंक्याक्रमण-विरोधेअन्तर्जालीय-सुरक्षानौ-सेनाकर्मिणां च सुरक्षाविषये सबलं प्रतिपादितम् ।नौसेन्यप्रमुख: फ्लीट-सपोर्ट-पोत-दीपक-स्यापि उद्घाटनं व्यदधात्, पोत-कर्म-चारिभिश्च सार्धं संवादमकरोत् इति।

8. --- अमेरिकादेशे राष्ट्रपति-निर्वाचनाय राष्ट्रपति डोनाल्ड ट्रंप् अथ च डेमोक्रेटिक दलस्य प्रत्याशी जो बाइडेन अनयोर्मध्ये नेश-विले क्षेत्रे अद्य अंतिमा राष्ट्रपतिपद-पत्याशिपरा परिचर्चा संवृत्ता । द्वयोः पक्षतः प्रचाराभियानेआरोपाः प्रत्यारोपाश्च सजवं विधीयन्ते । परिचर्चायाम् उपस्थितेभ्यः दर्शकेभ्यः मुख-नासिका-च्छादकम् अनिवार्यम् आसीत् । राष्ट्रपतिपदस्य प्रत्याशीनां कृतेनिर्देशका-योगेननवनियमाःउद्घोषिताः।नव-नियमानुसारंपञ्चदश-निमेषात्मिकायाःपरि-चर्चायाःप्रारम्भेद्वि-निमेषाःअव्यव-हितत्वेनसम्भाषणायप्रदत्ताः। अवधेयापदं वर्तते यत्ट्रंप-बाइडेनयो-र्मध्येसितंबर-मासेक्लीव-लैंडक्षेत्रेप्रथमापरिचर्चाविहिता आसीत् ।सी-पी-डीइतिलोकप्रिय-लोकतान्त्रिक-केन्द्रेण कोरोना-विषाणु-प्रकोपमालक्ष्य द्वितीया परिचर्चा अन्तर्जाल-माध्यमेन निश्चिता आसीत्, परम् अस्मिन् प्रतिभाग ग्रहणार्थं ट्रंपस्य अस्वीकृति-कारणेन द्वितीयेयं परिचर्चानिरस्ता जाता इति ।